15.09.20
4

नभः स्थलं दशमस्थानम् । नभः स्थलगतो राहुर्विधवां मृतभर्तृकां करोति । दिनकर आदित्यः पापे रतां पापकर्माणि सक्तां करोति । शनैश्चरः पापरतामेव। कुजोऽङ्गारको मृत्युं मरणं करोति । चन्द्रोऽर्थरहितां दरिद्रां कुलटां बन्धकीं च करोति । शेषा बुधबृहस्पतिशुक्रा धनवतीं वित्तान्वितां सुभगां भर्तृवल्लभां च कुर्युः।

एकादशस्थितानां सर्वग्रहाणां फलान्याह—

आये रविर्बहुसुतां सधनां शशाङ्कः
पुत्रान्वितां क्षितिसुतो रविजो धनाढ्याम् ।
आयुष्मतीं सुरगुरुः शशिजः समृद्धां
राहुः करोत्यविधवां भृगुरर्थयुक्ताम् ॥

यदि वैवाहिक लग्न से एकादश भाव में रवि हो तो बहुत पुत्र वाली, चन्द्र हो तो धन से युत, मंगल हो तो पुत्र से युत, शनि हो तो धनाढ्य, बृहस्पति हो तो बहुत दिन तक जीवित रहने वाली, बुध हो तो धन से युत, राहु हो तो पतियुक्त और शुक्र हो तो धन से युत स्त्री को करता है।

एकादशस्थाने रविरादित्यो बहुसुतां प्रभूतपुत्रां कन्यकां करोति । शशाङ्कश्चन्द्रः, सधनां वित्तान्विताम् । क्षितिसुतोऽङ्गारकः पुत्रान्वितां सुतसंयुक्ताम् । रविजः सौरो धनाढ्यामीश्वरीम् । सुरगुरुर्जीव आयुष्मतीं चिरजीविनीम् । शशिजो बुधः समृद्धां सधनाम् । राहुरविधवां जीवद्भर्तृकाम् । भृगुः शुक्रोऽर्थयुक्तां सधनां करोति ।

डॉ० सुधिर कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ०सं०महावि० सुल्तानपुर,
पूर्णियाँ।

स्थानं च। भौमस्तु सेनानायकः। राज्ञः सुखरक्षणं दुर्गरक्षणं च सेनाधीशस्याऽऽवश्यकत्वेन चतुरष्टमे भौमः पूर्णदृशा पश्यन्ति। तथा पञ्चमं विद्यास्थानम्। नवमं धर्मस्थानम्। विद्या शिक्षणं धर्मशिक्षणं च गुरोः मुख्यं कर्म तेन बृहस्पतिः नवमं पञ्चमं च पूर्णदृशावलोकयतीति।

क्षेमङ्करी — सप्तम (जाया) भाव को सभी ग्रह पूर्ण दृष्टि से देखते हैं। शनि गुरु और मंगल सप्तम के अतिरिक्त स्थान जैसे शनि तृतीय-दशम स्थानों, गुरु नवम व पञ्चम स्थानों और मंगल चतुर्थ व अष्टम स्थानों को भी पूर्ण दृष्टि से देखते हैं।

विमर्श — विभिन्न जातक ग्रन्थों में ग्रहों की पूर्ण दृष्टि के अतिरिक्त दृष्टि भी मानी गई है। जैसे- पूर्ण दृष्टि, एक पाद दृष्टि, द्विपाद दृष्टि और त्रिपाद दृष्टि। वहीं सभी ग्रह जाया स्थान (सप्तम) को पूर्ण दृष्टि से देखते हैं। जबकि शनि ७, ३, १० को, गुरु ७, ५, ९ को मंगल ७, ४, ८ को पूर्ण दृष्टि से ही देखते हैं।

डॉ० सुदिष्ट कुमार
सहा० प्राध्यापक (ज्योतिष)
रा०उ०सं०महावि० सुखसेना,
पूर्णियाँ।

उपशास्त्री

संज्ञाध्यायः

15.09.20
1

ग्रह दृष्टि विशेषतामाह —

पश्यन्ति सप्तमं सर्वे शनिजीवकुजाः पुनः।
विशेषतश्च त्रिदशत्रिकोणचतुरस्रमान् ॥

अन्वयः — सर्वे (ग्रहाः) सप्तमं पश्यन्ति पुनश्च विशेषतः शनिजीवकुजादयः क्रमेण त्रिदशत्रिकोणचतुरस्रमान् पश्यन्ति।

संस्कृत — पश्यन्तीति। स्वाधिष्ठितस्थानात्सप्तमं स्थानं सर्वे ग्रहाः पश्यन्ति पुनः शनिजीवकुजाः क्रमेण विशेषतः त्रिदशत्रिकोणचतुरस्रमान् पश्यन्ति। त्रिदशं तृतीयं दशमं च शनिः पूर्णदृशाऽवलोकयति। त्रिकोणं नवमं पञ्चमं च गुरुः पूर्णं दृशाऽवलोकयति। चतुर्थमष्टमञ्च भौमः पूर्णं दृशा पश्यति। ननु दृष्टिविषयको विशेषो ग्रन्थान्तरतः सिद्धः एवात्र स्थलेखनं किमर्थं तत्रोच्यते ग्रन्थान्तरेषु त्रिदशत्रिकोणचतुरस्रसप्तमानित्यादिना ग्रहाणां पाददृष्टिरभिहिता अत्र तु पूर्णं दृष्टिरेवाचार्यस्याभिमता तेनात्रग्रथनं समीचीनमिति। एवमेतेषां पूर्णदृष्टौ विशेषत्वे कारणं पूर्वैः कल्पितम् यथास्वस्वस्थानात् सप्तमं कलत्रस्थानं जाया रक्षणं सर्वेषामावश्यकम् उक्तमपि —

स्वां प्रसूतिं चरित्रं च कुलमात्मानमेव च।
स्वं च धर्मं प्रयत्नेन जायां रक्षन्हि रक्षति॥

तेन सर्वे ग्रहाः सप्तमं पूर्णं पश्यन्ति प्रतिक्षणं तत्स्थानं मनसि स्मरन्तीतिभाव एवमेव तृतीयं पराक्रमस्थानं दशमं राज्यस्थानं शनिः भृत्यः राज्ञो राज्यरक्षा बलरक्षा च भृत्यस्य मुख्यं कर्म अतः शनिस्तृतीयं दशमं सप्तमं च पूर्णदृशावलोकयति। चतुर्थं सुखस्थानम् अष्टममरिष्टस्थानम्। कुजं

P.T.O

शास्त्री-III

15.09.20
3

विवाहपटलाध्याय:

नवमस्थानस्थितानां सर्वग्रहाणां फलान्याह—

धर्मे स्थिता भृगुदिवाकरभूमिपुत्रा
जीवश्च धर्मनिरतां शशिजस्त्वरोगाम्।
राहुश्च सूर्यतनयश्च करोति वन्ध्यां
कन्याप्रसूतिमटनां कुरुते शशाङ्कः॥

यदि विवाहकाल में लग्न से नवम् स्थान में शुक्र, सूर्य, मंगल या गुरु हो तो स्त्री को धर्म करने वाली, बुध हो तो निरोग, राहु और शनि हो तो वन्ध्या तथा चन्द्र हो तो कन्या उत्पन्न करने वाली और घूमने वाली बनाता है।

भृगुः शुक्रः। दिवाकर आदित्यः। भूमिपुत्रो-ऽङ्गारकः। जीवो बृहस्पतिश्च। एते सर्वे एव धर्मे नवमस्थाने स्थिता धर्मनिरतां कन्यकां कुर्युः। शशिजो बुधः। अरोगां कल्याणीं करोति। राहुः सैंहिकेयः। सूर्यतनयः सौरिः। एतौ वन्ध्यामपुत्रां कुरुतः। शशाङ्कश्चन्द्रः कन्याप्रसूतिं कन्याजननशीलाम्। अटनां भ्रमणशीलां च करोति।

दशमस्थितानां सर्वग्रहाणां फलान्याह—

राहुर्नभःस्थलगतो विधवां करोति
पापे रतां दिनकरश्च शनैश्चरश्च।
मृत्युं कुजोऽर्थरहितां कुलटां च चन्द्रः
शेषा ग्रहा धनवतीं सुभगां च कुर्युः॥

यदि वैवाहिक लग्न से दशम भाव में राहु बैठा हो तो स्त्री को विधवा, सूर्य या शनि हो तो पाप करने वाली, मंगल हो तो मृत्यु, चन्द्र हो तो निर्धन और कुलटा तथा शेष ग्रह (बुध, गुरु, और शुक्र) हो तो स्त्री को धनवती और सुभगा करता है।

P.T.O